# RAMAKRISHNA MISSION VIDYAMANDIRA

(Residential Autonomous College affiliated to University of Calcutta)

**B.A./B.Sc. THIRD SEMESTER EXAMINATION, DECEMBER 2018**
**SECOND YEAR [BATCH 2017-20]**
**SANSKRIT [General]**
**Paper : III**

Date : 22/12/2018
Time : 11 am – 2 pm
Full Marks : 75

1. **एकस्य** प्रश्नस्योत्तरं लेख्यम्। [1×12]
   a) शाकुन्तले विदूषकस्य नाम किम्? कस्मिन् कस्मिन् अङ्के तस्य दर्शनं प्राप्यते? नाटकेऽस्मिन् योगदानं तस्य किमस्ति? [1+1+10]
   b) शकुन्तलाप्रत्याख्यानवृत्तं संक्षेपेण उपन्यसनीयम्। तदनुसारं दुष्यन्त–शकुन्तलयोश्चरित्रं वर्णनीयम्। [6+(3+3)]
   c) शाकुन्तलनाटकमाश्रित्य धीवरवृत्तान्तः समुपस्थाप्यताम्। [12]

2. **चत्वारः** प्रश्नाः समाधेयाः। [4×2]
   a) धनमित्रः कः? तस्य कीदृशं व्यसनं सञ्जातम्?
   b) करभकः कः? कस्मिन् अङ्के स प्राप्यते?
   c) दुर्वाससः शापः लिख्यताम्।
   d) 'प्रवर्ततां प्रकृतिहिताय पार्थिवः' इत्यत्र गणनिर्देशपुरःसरं छन्दो निर्णेयम्।
   e) 'वस्ताभिरष्टाभिरीशः' इत्यत्र सन्धिविश्लेषणं कार्यम्।
   f) कस्मिन् अङ्के दुष्यन्त–शकुन्तलयोः मिलनं जायते?
   g) शकुन्तलातनयस्य नामद्वयं लेख्यम्।

3. वङ्गभाषया पद्य**स्यैकस्या**नुवादः करणीयः। [1×6]
   a) सरसिजमनुविद्धं शैवलेनापि रम्यं
      मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
      इयमधिकमनोज्ञा वल्कलेनापि तन्वी
      किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।
   b) पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
      नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
      आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
      सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।
   c) स्वप्नो नु माया नु मतिभ्रमो नु
      क्लिष्टं नु तावत्फलमेव पुण्यम्।
      असन्निवृत्त्यै तदतीतमेते
      मनोरथा नाम तटप्रपाताः।।

4. सप्रसङ्गं व्याख्यायतां पद्य**मेकम्**। [1×8]
   a) यात्येकतोऽस्तशिखरं पतिरोषधीना–
      माविष्कृतोऽरुणपुरःसर एकतोऽर्कः।
      तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
      लोको नियम्यत इवात्मदशान्तरेषु।।

b) शमप्रधानेषु तपोधनेषु
गूढं हि दाहात्मकमस्ति तेजः।
स्पर्शानुकूला इव सूर्यकान्ता-
स्तदन्यतेजोऽभिभवाद् वमन्ति।।

c) असंशयं क्षत्रपरिग्रहक्षमा
यदार्यमस्यामभिलाषि मे मनः।
सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः।।

5. **<u>एकस्य</u>** प्रश्नस्योत्तरं लेख्यम्। [1×6]

a) **<u>एकस्य</u>** सन्दर्भस्य भावार्थः परिष्करणीयः।
(क) न प्रभातरलं ज्योतिरुदेति वसुधातलात्।
(ख) अचेतनं नाम गुणं न लक्षयेत्।
(ग) अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र।

b) विषयद्वयमवलम्ब्य टीका**<u>द्वयं</u>** लेख्यम्। [2×3]
विष्कम्भकः, मेनका, कुलपतिः, भरतवाक्यम्।

6. **<u>एकः</u>** प्रश्नः समाधेयः। [1×10]

a) मनुसंहितानुसारं युद्धनीतिः वैशद्येन वर्णनीया।
b) दुर्गे मनुमुनिमतं वैशद्येन उपस्थापनीयम्।
c) कामजव्यसनानां स्वरूपं मनुसंहितामवलम्ब्य विस्तरेण वर्णनीयम्।

7. वङ्गभाषया पद्य**<u>स्यैकस्या</u>**नुवादः कार्यः। [1×5]

a) अलब्धं चैव लिप्सेत लब्धं रक्षेत् प्रयत्नतः।
रक्षितं वर्धयेच्चैव वृद्धं पात्रेषु निक्षिपेत्।।

b) शुचिना सत्यसन्धेन यथाशास्त्रानुसारिणा।
प्रणेतुं शक्यते दण्डः सुसहायेन धीमता।।

c) अमात्ये दण्ड आयत्तो दण्डे वैनयिकी क्रिया।
नृपतौ कोषराष्ट्रे च दूते सन्धिविपर्ययौ।।

8. **<u>एकस्य</u>** प्रश्नस्योत्तरं लेख्यम्। [1×6]

क) सप्रसङ्गं व्याख्यायतां **पद्य<u>मेकम्</u>**।

a) सममब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे।
प्राधीते शतसाहस्रमनन्तं वेदपारगे।।

b) अपि यत् सुकरं कर्म तदप्येकेन दुष्करम्।
विशेषतोऽसहायेन किमु राज्यं महोदयम्।।

c) बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति।।

ख) विषय**<u>द्वय</u>**मवलम्ब्य संक्षिप्तटीका**<u>द्वयं</u>** विरचनीयम्। [2×3]
मात्स्यन्यायः, ब्राह्मनिधिः, षाड्गुण्यम्, आन्वीक्षिकी।

9. प्रश्न**<u>द्वयं</u>** समाधेयम्। [2×2]

a) 'तज्ज्ञावेतावुभौ' इत्यत्र सन्धिविच्छेदः करणीयः।

b) पैशुन्यं किम्? का चासूया?

c) चत्वार आश्रमाः के?

d) कस्त्रिवर्गः?

e) 'वरिष्ठमग्निहोत्रेभ्यो ब्राह्मणस्य <u>मुखे</u> हुतम्' इत्यत्र मुखशब्दस्यार्थः कः?

10. अनुच्छेद**<u>स्यैकस्या</u>**नुवादः कार्यो **<u>वङ्ग</u>**भाषया। [1×10]

a) ऋषेर्विश्वामित्रस्य मध्यमः पुत्रो मधुच्छन्दाः। ततो ज्यायांसः पञ्चाशत्, पञ्चाशच्च कनीयांसः। विश्वामित्र आजीगर्तिं शुनःशेपं पुत्ररूपेण स्वीकृतवान्। मधुच्छन्दसो ज्यायांसः पञ्चाशत्संख्याका विश्वामित्र-पुत्राः शुनःशेपस्य विश्वामित्रपुत्रत्वं नाङ्गीकृतवन्तः अतो विश्वामित्रस्तान् प्रति शापवाक्यं व्याजहार।

b) कविकुललब्धप्रतिष्ठस्य कालिदासस्य यशःकायकल्पा बहवः प्रबन्धाः पृथक् पृथक् मुद्रितास्सन्ति मुद्र्यन्ते च। तथापि काव्यामृतपानलोलुपानां केषाञ्चन सहृदयानां पुनःपुनरभ्यर्थनया कालिदासीयप्रबन्धरत्नानि क्रमशः प्रकटीकर्तुमुपक्रान्तम्।

——————— × ———————